ISSN : 2583-2271
Vol. - I, No. 1: 2021

# देवीसूक्ते सृष्टिप्रक्रिया

## निमाइ साँतरा

### प्रबन्धसारः

*सह-इनि+ष्यञ् प्रत्यययोगेन क्लीवलिङ्गे प्रथमाविभक्तो एकवचने साहित्यम् इति पदं निष्पन्नं भवति। संस्कृतभाषामवलम्ब्य रचितं यत् साहित्यं तत् संस्कृतसाहित्यम्। संस्कृतसाहित्यं त्रिधा विभक्तं - वैदिकसाहित्यं लोकिकसाहित्यं वैज्ञानिकसाहित्यं च। वैदिकसाहित्यं चतुर्द्धा विभक्तंम् - संहिता ब्राह्मणं आरण्यकम् उपनिषद् च। तन्मध्ये संहिता चतुर्द्धा विभक्ता - ऋग्वेदः सामवेदो यजुर्वेदोऽथर्ववेदश्चेति।तन्मध्ये ऋग्वेदसंहितायाः विषयवस्तुवैचित्रं ज्ञानभाण्डारपरिपूर्णम्।तत्र यथा देवताधर्मादिविषयात्मकं सूक्तं प्राप्यते तथैव जगत्सृष्टिभावनालम्बितं दार्शनिकचिन्तासमृद्धं सूक्तमपि दृश्यते। सूक्तेषु मन्त्राः सन्ति। मन्त्राः त्रिविधाः - प्रत्यक्षकृतं परोक्षकृतं आध्यात्मिकं च।तन्मध्ये आध्यात्मिकमन्त्राः स्वल्पासंख्यकाः दृश्यन्ते। आध्यात्मिकसुक्ते 'अहम्' सर्वनामेन कविः भाषणं करोति। ऋग्वेदस्य अल्पसंख्याविधातृनामाध्यात्मिकसूक्तानां विशिष्टभावनासमृद्धं वैचित्र्यात्मकं देवीसूक्तम्। देवीसूक्ते ऋषिः आम्भृणी वाक्। वाक्देवी रूद्रादिदेवात्मना चरति मित्रावरुणादीन् च देवान् धारयति। वाक्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत् विवर्त्तते। इमे दर्शनप्रसिद्धा अर्था देवीसूक्ते प्राप्यन्ते। सूक्तमिदं चातिवादृतं लोकसमाजे देवीनामाङ्कितत्वात्, वङ्गदेशेषु देवीपूजायां प्रयुज्यत्वात्, देव्याः परमात्मनश्च एकात्मकत्वात्।*

आर्यमनीषिणः उज्ज्वलप्रभास्वरूपाया ऋग्वेदसंहिताया विषयवस्तुवैचित्र्यं ज्ञानभाण्डारपरिपूर्णम्। अत्र यथा देवताधर्मादिविषयात्मकं सूक्तं प्राप्यते तथैव जगत्सृष्टिभावनावलम्बितं दार्शनिकचिन्तासमृद्धं सूक्तमपि दृश्यते। एतानि सूक्तानि वैदिकर्षीणां सृष्टितत्त्वविषयकानि।

यास्काचार्येण वैदिकमन्त्राः प्रत्यक्षकृत-परोक्षकृत-आध्यात्मिकभेदेन त्रिधा विभक्ताः। तथाहि उच्यते–"तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिकाश्च"[1]। एतादृशानां मन्त्राणां मध्ये प्रत्यक्षकृताः परोक्षकृताश्च मन्त्रा वेदे दृश्यन्ते, परन्तु आध्यात्मिकमन्त्राः अतीवाल्पा लभ्यन्ते। तथाहि उच्यते– "परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठाः आल्पश आध्यात्मिका:"[2]। आध्यात्मिक-सूक्तस्य वैशिष्ट्यं भवति यत्- अत्र उत्तमपुरुषस्य 'अहम्' अनेन सर्वनाम्ना कविः भाषणं करोति। ऋग्वेदस्य अल्पसंख्याविधृतानामाध्यात्मिकसूक्तानां विशिष्टभावनासमृद्धं वैचित्र्यात्मकं देवीसूक्तम्।

ऋग्वेदस्य दशममण्डले वागाम्भृणीयं सूक्तं श्रूयते। अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी सूक्तेनानेन स्वात्मानम् अस्तौत्। तथाहि उच्यते - "अनृमष्टौ वागाम्भृणी तुष्टावात्मानम्"[3]। सच्चित्सुखात्मकः सर्वगतः परमात्मा एव देवता। तेन परमात्मना तादात्म्यमनुभवन्ती ह्येषा वाक्, सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वम् अभवमिति स्वात्मानं स्तौति। उच्यते - "वाङ् नामाम्भृणी। अम्भृणस्य महर्षेः पुत्री। आत्मानं तुष्टाव। सेयमेवर्षिका देवता चेत्यर्थः।"[4] आध्यात्मिकमिदं सूक्तम् उत्तमपुरुषयोगात् ऋषिदेवताया अभेदप्रतिपादनाच्च। तथा चोक्तम् – "उत्तमस्य तु वर्गस्य यः ऋषिः सैव देवता" इति।

---

[1] नि. ८/१/१-३
[2] नि.
[3] सर्वाणु
[4] षड्गुरु.

ISSN : 2583-2271
Vol. - I, No. 1: 2021

वाग्देवी रुद्रादिदेवात्मना चरति, मित्रावरुणादीन् च देवान् धारयति। वाक्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत्, शुक्तौ रजतमिव अध्यस्तं सद् दृश्यते। मया च जगदाकारेण विवर्तते। तदा हि ब्रह्मणः तत्तदुपाध्यवच्छेदेन रुद्रादिदेवतारूपेण भेदावभासः किञ्च सा वाक् स्वभक्तेभ्यः धनादिकं प्रयच्छति। "अहं दधामि द्रविणं हविष्मते। सुप्राव्ये यजमानाय सुन्वते।"

ईश्वरो हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान् विदधन्, देशकालाविशेषाभिज्ञतां कर्मिणां कर्मानुरूपं फलं प्रयच्छति। तदुक्तं – "फलमत उपपत्तेः"[5]।

अद्वितीयब्रह्मस्वरूपा सा आत्मानं राष्ट्रीति निर्दिशति- "अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्"[6] इति। परमात्मा हि समग्रस्य सृष्टिप्रपञ्चस्य नियन्ता आत्मनः एव शक्त्या इन्द्रियाणां व्यापारवत्वम्। उच्यते – "मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ई शृणोत्युक्तम्"[7] इति। ब्रह्मणः शक्त्या एव सर्वे शक्तिमन्तः। अत एव स्वात्मतया ब्रह्म ज्ञातवती अम्भृणतनया आह – "श्रुधि श्रुतश्रद्धिवं ते वदामि"[8] इति।

कारणभूते परमात्मनि वियदादिकार्यजातं सर्वं वर्तते – तन्तुषु पट इव। परमात्मा च कारणभूतेन मायात्मकेन देहेन कृत्स्नं विकारजातं व्याप्नोति। यथा वायुः परेणाप्रेरितः स्वेच्छया इव प्रवाति तद्वत् ब्रह्माभिन्ना वागपि सर्वाणि भूतजातानि कारणरूपेण उत्पादयन्ती परेण अनधिष्ठिता प्रवर्तते। सर्वस्मात् विकारजातं परस्तात् विद्यमाना सा असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपं महिम्ना एतत् सर्वं भूत्वा स्थिता। इमे दर्शनप्रसिद्धा अर्था देवीसूक्ते प्राप्यन्ते। सूक्तमिदं चातीवादृतं लोकसमाजे देवीनामाङ्कितत्वात्, बङ्गदेशेषु देवीपूजायां प्रयुज्यत्वात्, देव्याः परमात्मनश्च एकात्मत्वात्।

निघण्टौ वाङ्नामासौ गौरी इति पठ्यते। गोरीति देव्या अपि समाख्यानम्। तेन एषा सूक्तद्रष्टी वाक् अम्बिकैव इति वृद्धव्यवहारः। सप्तसतीपाठाङ्गजपे सूक्तस्यास्य विनियोगो दरीदृश्यते। शक्तिस्वरूपाया अम्बिकायाः शक्तिमत ईश्वरस्य च पारमार्थिको भेदो नास्तीति सूक्ते प्रतिपादितम्। अत एव एकैवाहं जगत्यत्र (चण्डी) इत्युक्तिः सङ्गच्छते। उत्तरकाले वैष्णवदर्शनस्य यो भक्तिवादो दृश्यते तस्यैव सूचना अत्र लक्ष्यते – इति चास्य सूक्तस्य अभिमतत्वे कारणम्।

वाग्देवीमुद्दिश्य अपरापि ऋग्दृश्यते दशममण्डले।[9] उक्तं चास्मिन् सूक्ते भद्रैषा लक्ष्मीर्निहिताधिवाचि विश्वव्यापिन्यां वाचि लक्ष्मीः निहितेति।

भर्तृहरिणा वाक्यपदीये ग्रन्थे उच्यते यं वयम् उपनिषदि ब्रह्मतत्त्वेन जानामि, सा तु वाक् इदं जगत् च तस्या एव विवर्तितं प्रक्रियामात्रम्। उच्यते - "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति।

अथर्ववेदे पाठान्तरसहितं देवीसूक्तं प्राप्यते। तत्तु वाग्देवीसूक्तरूपेण परिचितमस्ति। सूक्तस्यास्य आथर्वणिक्कर्मणि तथा गृह्यकर्मणि विनियोगः प्राप्यते। मेधाजननकर्मणि तथा शिशोः प्राग्भाषणात् आचरितकर्मणि सूक्तस्यास्य विनियोगो दरीदृश्यते।

याज्ञिकधारायां सूक्तमिदं स्वल्पे प्रयोगे सति पौराणिकदेवीपूजायां सूक्तस्यास्य

---

[5] ब्र.सू.

[6] ऋ. सं. १०/१२५/३

[7] ऋ.सं. १०/१२५/४

[8] ऋ. सं. १०/१२५/४

[9] ऋ.सं. १०-७१

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अतीवगभीरं गुरुत्वं परिलक्ष्यते चण्डीपाठकाले देवीसूक्तमवश्यपठनीयमिति निर्देशः अस्ति। तथाहि उच्यते - "रात्रिसूक्तं जपेदादौ मध्ये चण्डीस्तवं पठेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः"[10] इति।

मार्कण्डेयपुराणे कथ्यते सरथसमाधिश्च जगन्मातुः सम्यग्दर्शनलाभार्थं नदीतीरे अवस्थानकाले देवीसूक्तपाठेन तस्य भावार्थानुधावनेन तपस्यारतौ अभवताम्- "स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्।" इति।

**सहायकग्रन्थाः**


- अथर्ववेदः, दुर्गादासलाहिडीशर्मा (सम्पा.), आजमीडवैदिकयन्त्रालयः।
- आपस्तम्बश्रौतसूत्रम्, टि. टि., श्रीनिवासगोपालाचार्यः (सम्पा.), माइसोर, १९५४
- ऋग्वेदसंहिता, एन्. एस्. सोनटाक्का (सम्पा.)। वैदिकसंशोधनमण्डल
- ऐतरेयारण्यकम्, ए. वि. कीथ् (सम्पा.)। अक्सफोर्ड, १९०९
- छान्दोग्योपनिषद्, दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पा.), कलिकाता, १३२७
- तैत्तिरीयसंहिता, महादेवशास्त्री (सम्पा.), माइसोर, १८९८
- तैत्तिरीयोपनिषद्, इ. आर्. रोयारः (सम्पा.), मीइसोर, १८५०
- तैत्तिरीयारण्यकम्, ए. महादेवशास्त्री (सम्पा.), माइसोर, १९००
- निरुक्तम्, विनायकगणेश आप्टे (सम्पा.)। आनन्द आश्रम, १९२१
- ब्रह्मसूत्रम्, दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पा.), कलिकाता
- बृहदारण्यकोपनिषद्, मेजोर वि. डि. वसुः (सम्पा.), एलाहावादः, १९९६
- बौधायनश्रौतसूत्रम्, डव्लिउ. कालाण्ड (सम्पा.), कलिकाता, १९०९


10 म.क.व.